व्यमिति वदन्ति । आनन्दविशेषजनकवाक्यं काव्यमिति रसगङ्गाधरः ।

तद्भेदाः प्रथमं त्रिविधाः उत्तममध्यमाधमभेदात् । यथाह काव्यप्र०

"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ।
अतादृशि गुणीभूतव्यङ्ग्यं काव्यं तु मध्यमम् ।
शब्दचित्रं वाच्यचित्रमव्यङ्ग्यन्त्ववरं स्मृतम्" ।

रसगङ्गाधरे तु अर्थचित्रापेक्षया शब्दचित्रस्याल्पचमत्कारकारित्वात्तस्याधमाधमत्वोक्त्या काव्यभेदचातुर्विध्यमुक्तम् । सा० द० मते अव्यङ्ग्यस्य काव्यत्वाभावात् ध्वनिगुणीभूतव्यङ्ग्यभेदेन द्वैविध्यमिति भेदः । तद्भेदाः सोदाहरणं दर्शिता तत्र यथा ।

"काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यञ्चेति द्विधा मतम्" । मू० तत्र।"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्"मू० "वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्" वृत्तिः

"भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।
"अविवक्षितवाच्योऽन्योविवक्षितान्यपरवाच्यश्च"। मू०

"तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः। लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अत एवात्र वाच्यं विवक्षितम् अन्यपरं व्यङ्ग्यनिष्ठम् अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य । अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः । अविवक्षितवाच्यस्य भेदावाह" वृत्तिः

"अर्थान्तरं सङ्क्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति" मू० ।

"अविवक्षितवाच्यो नाम ध्वनिरर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसङ्क्रमितत्वादर्थान्तरसङ्क्रमितवाच्यत्वम् यथा । "कदली कदली करभः करभः करिराजकरः करिराजकरः । भुवनत्रितयेऽपि बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः"। अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादि गुणविशिष्टस्वार्थपरा" जाड्याद्यतिशयस्य व्यङ्ग्यः । यत्र पुनः स्वार्थं सर्व्वथा परित्यजन्नर्थान्तरे परिणमति तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम् । यथा "निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते" । अत्रान्धशब्दो मुख्यार्थे बाधितोऽप्रकाशरूपमर्थं बोधयति अप्रकाशातिशयश्च व्यङ्ग्यः । अन्धत्वाप्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तरसङ्क्रमितवाच्यत्वम् । यथा "भम धम्मिअ ! वीसत्थो सो सुणहो अज्ज मारिओ देन । गोलाणईकच्छकुडङ्गवासिना दरीअसीहेन" । अत्र भ्रम धार्म्मिकेत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमानतया भ्रमणनिषेधे पर्य्यवस्यतीति विपरीतलक्षणाशङ्का न कार्य्या । यत्र खलु विधिनिषेधावुत्पद्यमानावेव निषेधविध्योः पर्य्यवस्यतस्तत्रैव तदवसरः । यत्र पुनः प्रकरणादिपर्य्यालोचनेन विधिनिषेधयोर्निषेधविधी अवगम्येते तत्र ध्वनित्वमेव । तदुक्तम्

"क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम् ।
पूर्व्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु" ।

अत्राद्ये मुख्यार्थस्यार्थान्तरे सङ्क्रमणं (प्रवेशः) न तु तिरोभावः अत एवात्राजहत्स्वार्थलक्षणा । द्वितीये तु स्वार्थस्यात्यन्तं तिरस्कृतत्वाज्जहत्स्वार्था" वृत्तिः ॥

"विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं ततः। असंलक्ष्यक्रमो यत्र व्यङ्ग्यो लक्ष्यक्रमस्तथा"मू०

"विवक्षितान्यपरवाच्योऽपि ध्वनिरसंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविधः" वृत्तिः ।

"तत्राद्यो रसभावादिरेक एवात्र गण्यते । एकोऽपि भेदोऽनन्तत्वात् सङ्ख्येयस्तस्य नैव यत्"मू०

"उक्तस्वरूपो रसभावादिरसंलक्ष्यक्रमव्यङ्ग्यः । अत्र व्यङ्ग्यप्रतीतेर्व्विभावादिप्रतीतिकारणकत्वात् क्रमोऽवश्यमस्ति किन्तु उत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते । एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात् सङ्ख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यमेकभेदमेवोक्तम् । तथाहि एकस्यैव शृङ्गारस्य एकोऽपि सम्भोगरूपो भेदः परस्परालिङ्गनाधरपानचुम्बनादिभेदात् प्रत्येकञ्च विभावादिवैचित्र्यात् सङ्ख्यातुमशक्यः का गणनात्र सर्व्वेषाम्" वृत्तिः ॥

"शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे । ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः" मू०

"क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यङ्ग्यस्तस्य शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेन च त्रैविध्यात् संलक्ष्यक्रमव्यङ्ग्यनाम्नो ध्वनेः काव्यस्यापि त्रैविध्यम्" वृत्तिः । तत्र